**अरुष** त्रि० न रोषति क्रुध्यति रुष–क न०त०। १अक्रोधने। "युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः" यजु० २३,५ "असौ वा आदित्योब्रध्नोऽरुषः" इति श्रुतिः। विरोधे न०त०। २ रोचमाने। "श्वेतं सद्मानमरुषं वहिता" ऋ० ३,१,४, 'अरुषं रोचमानम्' भा०। ऋ–गतौ–उषन्। ३ गमनशीले अश्वादौ वेदे स्त्रियां ङीप्। "युक्ष्वाह्यरुषी रथे" ऋ०१,१४,१२, अरुषीः गमनशीला वड़वाः" भा०। रुषा हिंसा न०ब०। ४हिंसारहिते "जानन्ति वृष्णो अरुषस्य शेवम्" ऋ० ३,७,५,। "अरुषस्य हिंसारहितस्य" भा०। [स्त्री निरु०।

**अरुष्** त्रि०नास्ति रुट् यस्य। १अक्रोधे। गौ०ङीष्। २उषसि

**अरुष्क** पु० अरुर्मर्म्मस्थानं कायति पीड़यति कै–क। स्पर्शमात्रेण व्रणकारकफलरसे (भेला) भल्लातकवृक्षे।

**अरुष्कर** पु० अरुः करोति ट उप०स० षत्वम्। स्पर्शमात्रेण व्रणकारकफलरसे १भल्लातके (भेला) २व्रणकारके त्रि० "शुष्कोह्यपार्थकोऽरुष्करस्य" सुश्रु०। स्त्रियां ङीप्।

**अरुस्** पु०ऋ–उसि। १अर्के, २रक्तखदिरे च। ३मर्म्मणि न०। ४व्रणे, ५क्षते च पु०न०। "अरुर्द्विषदजन्तस्य मुम्" पा०। 'अरुर्वै' पुरुषोऽवच्छिन्नः अनरुरेवैतद्भवति" शत०ब्रा०। "यद्दण्डेन यदिष्वा यद्वारुषा हरसा" अथ०५,५,४। "अरुर्वै पुरुषस्याप्नोति" शत०ब्रा० उक्ते ई नेत्वे च। अरुस्+अभूतद्भावे च्वि अन्तलोपः दीर्घः अरूकरोति।

**अरुहा** स्त्री न किञ्चिन्मूलमाश्रित्य रोहति रुह+क। भूम्यामलक्याम् राजनि०। कृशा० कण्। आरुहीयम् तत्सन्निकृष्टदेशादौ त्रि०।

**अरूक्ष** त्रि० विरोधे न०त०। स्निग्धे मसृणे, "दर्भैः प्रच्छादयत्यरूक्षतायै", शत०ब्रा०।

**अरूक्षित** त्रि०न रूक्षितः विरोधे न०त०। स्निग्धे मसृणे, "अरूक्षितं इष आ रूपे अन्नम्" ऋ०४,११,९, अरूक्षितं स्निग्धम्" भा०।

**अरूक्ष्ण** त्रि०रूक्ष+नन् विरोधे न० त०। स्निग्धे। "यत्ते वासः परिधानम्–संस्पर्शेऽरूक्ष्णमस्तु ते" अथ०८,२,१६।

**अरूप** त्रि० नास्ति रूपमस्य। १रूपशून्ये २सांख्योक्ते प्रधाने वेदान्तोक्ते ३ब्रह्मणि न० "अशब्दमस्पर्शमरूपमव्ययमिति" कठ०उ०। कुत्सितार्थे न०त०। ३कुत्सितरूपे न०।

**अरूपहार्य्य** त्रि० रूपेण न हार्य्यः वशीकार्य्यः अस०स०। सौन्दर्य्यादिना अवशीकार्य्ये "अरूपहार्य्यं मदनस्य निग्रहात्" कुमा०।

**अरेणु** पु० ऋ–उषन्। १सर्पविशेषे २ सूर्य्ये च सि० कौ०।

**अरे** अव्य० ऋ–ए। १रोषाह्वाने, २नीचसंबोधने "आत्मा वा अरे द्रष्टव्यः श्रोतव्य इति" न वा अरे पत्युः कामायाप्नाः पतिः प्रियो भवति" शत० ब्रा० बहुकृत्वः पाठः। तत्र याज्ञवल्क्येन मैत्रेयीनामकपत्नीं प्रति सम्बोधनायोक्तं तस्याश्च स्वापेक्षया न्यूनत्वात् नीचसम्बोधनम्। ३अपकृतौ, ४असूयायाञ्च।

**अरेपस्** त्रि० नास्ति रेपः पापं निरुक्तोक्तं यस्य १निष्पापे "प्रापे रूपी पुराऽरेपाः" इति माघः २निर्मले च "अरेपसा तन्वा शाशदाना" ऋ०१,१२४,५, अरेपसाऽपापया निर्म्मलया वा" भा०।

**अरेरे** अव्य० अरे+वीप्सायां द्विरुक्तिः। नीचसंबोधनादौ। २सक्रोधसम्बोधने च "अरेरे राधागर्भभारभूत! सूतापसद! किमेवमाक्षिपसि" अरेरे वाचाट! वृथाशस्त्रग्रहणदुर्विदग्ध! वटो" इति च वेणीसंहारः।

**अरोक** त्रि० रुच–दीप्तौ घञ् रोकश्छिद्रं दीप्तिश्च न०ब०। १छिद्रशून्ये २दीप्तिशून्ये च। "विभाषा श्यावारोकाभ्याम्" पा०बहुव्रीहौ एतत्पूर्व्वकदन्तस्य दत् । अरोकदन् अरोकदन्तः। निबिड़दन्ते दत्रादेशे स्त्रियां ङीप्।

**अरोग** त्रि० नास्ति रोगोऽस्य। रोगशून्ये "अरोगाः सर्व्वसिद्धार्थाश्चतुर्वर्षशतायुषः" सुश्रु०। "एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः" मनुः तस्य भावः ष्यञ्। आरोग्यम्। रोगाभावे न०"आयुरारोग्यविजयं देहि देवि! नमोऽस्तु ते" दुर्गास्तवः "आरोग्यं वित्तसम्पत्तिर्गङ्गास्मरणजं फलमिति" पुरा० तल् अरोगता स्त्री त्व अरोग्यत्वम्" तत्रैव न०।

**अरोगण** त्रि० रोगोऽस्त्यस्य बा०मत्वर्थे न न०त०। रोगशून्ये "तेषामसि त्वमुत्तममनास्रावमरोगणम्" अथ०२,३,२।

**अरोगिन्** त्रि० न रोगी विरोधे न०त०। रोगशून्ये "यावज्जीवमरोगी स्यात्" पुरा० स्त्रियां ङीप्। "अरोगिणीं श्चात्मतोम्" स्मृतिः।

**अरोचक** पु०न रोचयति प्रीणयति रुच+णिच्–ण्वुल् न०त०। रोगभेदे यत्र कचिदपि द्रव्ये भोजनादौ न प्रीतिस्तादृशे रोगे स च सुश्रुतोक्तः। 'दोषैः पृथक् सहजचित्तविपर्य्ययाच्च भक्तायनेषु हृदि चावतते प्रगाढम्। नान्ने रुचिर्भवति तं भिषजो विकारं भक्तोपघातमिह पञ्चविधं वदन्ति। हृच्छूलपीड़नयुतं विरसाननत्वं वातात्मके भवति लिङ्गमरोचके तु। हृद्दाहशोषबहुता मुखतिक्तता च